IJARSCT
International Journal of Advanced Research in Science, Communication and Technology
International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal
ISSN: 2581-9429
Volume 5, Issue 1, March 2025
Impact Factor: 7.67

# प्राचीनार्वाचीनयोरलङ्कारदृष्टयोर्भेदः

**अमरेन्द्र कुमार मिश्रः**
**सहाचार्य (साहित्य विभागः)**
**कालियाचक विक्रमकिशोर आदर्श संस्कृत महाविद्यालयः**
**पूर्वमेदिनीपुरं, पश्चिमबङ्गः**

प्राचीनाऽर्वाचीनालङ्कारदृष्टयो महानभेदः काव्यशास्त्रपरिशीलनादवाप्यते। प्राचीनदृष्टौ अलंकाराणां नवीनदृष्टौ च व्यंगयस्य प्राधान्मेय अभिहितम् । रसवस्त्वलङ्कारात्मकं व्यंग्यमलङ्कारपक्षनिक्षिप्तं मन्यन्ते प्राचीनाः। तत्र वस्तुमात्रं व्यंग्यं पर्यायोक्ताऽप्रस्तुतप्रशंसादौ वाच्योपस्कारकत्वेन निक्षिप्यते। उपमालंकारश्च रूपक- दीपकाऽपहनुत्यादौ वाच्योपस्कारकत्वेनोक्तः। उत्प्रेक्षायां प्रतीयमानता स्वीकृतैव। वामनोऽपि गुणालंकारयोः शोभाविशेषाद् भेदाविवक्षया ऽलङ्कारवादी एव। उद्भटादयस्त्वलङ्कारप्राधान्यसमर्थका एव, गुणालङ्कारयोः साम्यस्य स्वीकारात् । अलङ्कार एव काव्ये प्रधानमिति प्राचां मतम् । वक्रोक्तिजीवितकारोऽपि अलंकार प्राधान्यपोषकः, वक्रोक्तेः अलङ्कारत्वेन स्वीकारात् ८/९ तस्याश्च काव्यजीवितभूतत्वेनाभ्युपगतत्वात् ।

यथा-

'' उभावेतालङ्कार्यौ तयोः पुनरलंकृतिः।
वक्रोक्तिरेव वैदग्ध्यभङ्गीभणितिरूच्यते।।''

एषामलङ्कारप्राधन्यवादिनां नये अभिधाप्रकारविशेषा एव अलङ्काराः। अत्रैव द्योतकव्यंजकौ अपि अन्तर्भावम् भजतः '' द्योत्यव्यंग्ययोरर्थयोः प्रत्येयत्वसामान्यादुपचारात्'।।

किन्तु अलङ्काराणां प्रधानता अपैति नवीनाभिमतं, व्यंग्यप्राधान्यचाभ्युपगम्यते। व्यंग्यं नाभिधा – लक्षणा – तात्पर्या – ख्याव्यापारत्रयविषयम् अपितु ध्वनन – द्योतन –शब्दाभिधेय – व्यंजना व्यापारगम्यम् । अतएव नवीनाः व्यंग्यस्यार्थस्य प्रतीत्यै व्यंजनाव्यापारमवश्यमभ्युपगच्छन्ति। एष एव व्यंग्यार्थो वाक्यार्थत्वेन प्रधानः। तस्याभिधाव्यापारेव न, वाक्यार्थत्वाभावात् । नवीनालङ्कारिकानां मते व्यंग्यार्थस्य प्राधान्यम् ।

---

१. वकोक्तिजीवितम् - १ – उन्मेव – १० वीं कारिका


DOI: 10.48175/568

ISSN: 2581-9429
Volume 5, Issue 1, March 2025
Impact Factor: 7.67

२. वक्रोक्तिजीवितम् - १५ पृष्ठे

गुणालङ्कारौ च तमुपकुरुत:। अत: व्यंग्यार्थस्योपस्कार्यत्वमुपस्कारकत्वं च अलङ्काराणाम् । एवं ध्वनिपूर्ववर्तिना प्राचामलंकारप्रधान्यं ध्वनिकाले क्रमश: संकोचं भजद् गौणतां प्राप्त: ।

पूर्ववर्तिनामालङ्कारिकानां मतानुसारे रसवदलङ्कारतां निषिध्य केवलमङ्गत्व एव तेषामलङ्कारत्वमङ्गीचकार ध्वनिकार:।

रससामान्ये व्यापृता रसालंकारता केवलमङ्गत्व एव सीमिताऽभूत। मम्मटाचार्यस्तु काव्यलक्षणे ''अनलंकृती पनु: क्वापीति स्वीकृत्य गौणामप्यलङ्कारतां न सेहे। चन्द्रालोककारेण आचार्यजयदेवेन मम्मटस्यविरोध : कृत: । तद्यथा –

'' अङ्गीकरोति य: काव्यं शब्दार्थावनलंकृति।
असौ न मन्यते कस्मादनुष्णमनलंकृती।।

जयदेवानन्तरम् अलंकाराणां क्रमश: वर्धमानो विरोध: शमनं भेजे, अलङ्कारा: अक्षुण्णां प्रतिष्ठां प्रापु:। महामाहेश्वरै अभिनवगुप्तपादाचायैस्तु अलंकाराणां प्रतिष्ठा ध्वनिकालेऽपि मूर्धानमधिरोपिता स्वकथनेन, निराकृतश्च अलंकारविरोधिनां ध्वनितत्वावमर्शनविजृम्भिता उक्तयो।

आयार्च आन्नदवर्धनेनैव ध्वन्यालोके प्रतिपादितम् -

'' न ध्वननसद्भावेऽपि काव्यत्वव्यहार:, गुणालंकारविशिष्टशब्दार्थवपुषो वाक्यस्य एव काव्यत्वव्यहार इति।।

एवं प्राचीनार्वाचीनयोरूभयोरपि दृष्टयोरलंकाराणां महन्महत्वम् ।

सम्प्रति अलंकाराणा रस – रीतिगुणध्वनिवक्रोक्त्यौचित्यादिभ्योऽतीव संक्षेपेण भेद: प्रस्तूयते अलंकारात् ।

भिन्नोऽपिरस अलंकारप्राधान्यकाले दण्डिभामहादिभि: रसवदलङ्कार एव अन्तर्भावित:। यथा –

---

१. चन्द्रालोक : - प्रथममयूख – ८ उवीं कारिका

२. ध्वन्यालोक – प्रथमोद्योत् – ५९ पृष्ठे

'' इह त्वष्टरसायत्ता रसवत्ता स्मृता गिराम् ।।''

IJARSCT
International Journal of Advanced Research in Science, Communication and Technology
International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal
ISSN: 2581-9429
Volume 5, Issue 1, March 2025
Impact Factor: 7.67

एतएव रस – अलंकारयोरैक्यं प्रतीयते स्म, रसवदलड्कारस्याभ्युपगतत्वेनैव भेदो रसालंकारयो: । व्यंग्यप्राधान्ये रसो ध्वनिर्वा, अप्राधान्ये अन्यरसाड्गत्वे वा रसवदलड्कार इति भेदस्य स्फुटत्वात् ।। इति।

## अलंकारस्य रीतेश्च भेद:

आयार्च भामह – प्रतिपादिते काव्यालंकारे वैदर्भ- गौडमार्गप्रसड्गे सर्वप्रथमं रीतेश्चर्चा समुपलभ्यते –

" अलड्कारवदग्राम्यमर्थ्य न्याय्यमनाकुलम् ।
गौडीयमपि साधीयो वैदर्भमिति नान्यथा।

रीतितत्वस्यविस्तृतं विवेचनं दण्डिन: काव्यादर्शे समुपलभ्यतते। अतएव कतिपयै: दण्डि: रीते: पोषक: मन्बते, नालड्कारस्य। परमेतत् न सड्गतम यतोहि स्वयं दण्डिनापि रीति अलंकारत्वेन स्वीकृत: । उक्तमपि –

" काव्यशोभाकरान्धर्मानलड्कारान् प्रचक्षते।
ते चाद्यापि विकल्प्यन्ते कस्तान् कात्सर्न्येन वक्ष्यति।।

यश्च सन्ध्यड्ग वृत्यड्ग – लक्षणाद्यागमान्तरे व्यावर्णितिमिदं चेष्टामलंकारतयैव न: । दण्डयाचार्यपर्यन्तं रीत्यलड्कारयोर्गुणालड्कारयोर्वा ऐक्यमवतिष्ठते। वामनसमये गुणालड्कारयोर्भेदेन रीतेरलड्कारो भिद्यते, गुणानां काव्यशोभाधायकत्वात् अलड्कारस्य च तत्रोत्कर्षकारित्वात् " पूर्वे गुणा: नित्या: ताम् विना काव्यस्यासंभवात् । परे: अलंकारा अनित्यास्तद्भावेपिकाव्य – व्यवहारात् "। इत्थं रीत्यलड्कारयो: महानभेद:। अलंकारप्राधानयवादिनामिव आयार्च – वामनोऽपि गुणानां शब्दार्थवृत्तित्वं

---

१. दण्डी – काव्या – २.२९२

२. भामह – काव्यालडकार – १ – ३५

३. दण्डी – काव्यादर्श – २.१ – ३६७।

४. दण्डी – काव्यादर्श ३.१३

IJARSCT
International Journal of Advanced Research in Science, Communication and Technology
International Open-Access, Double-Blind, Peer-Reviewed, Refereed, Multidisciplinary Online Journal
ISSN: 2581-9429
Volume 5, Issue 1, March 2025
Impact Factor: 7.67

मनुते रीतिमपि अलड्कावररूपतयैवाऽभ्युपच्छति। उक्तमपि – ''सौन्दर्यमलड्कार:''। ध्वनिवादिनां मते गुणालड्कारयौ: स्वरूपमित्थम् -

'' तमर्थवलम्बन्ते येऽड्गिनं ते गुणा: स्मृता:।
अड्गाश्रितास्त्वलड्कारा: मन्तव्या: कटकादिवत् ।।''

ये रसादिसन्तमड्गिनं तमवलम्बन्ते, ते गुणा: शौर्यादिवत् वाच्यवाचकलक्षणानि अड्गानिये पुनस्तदाश्रिता अलंकारा: मन्तव्या: ।

ध्वनिवाद्या – चार्याणां मते गुणा: रसमात्रधर्मा: अलड्काराद्च शब्दार्थमात्रधर्मेति गुणालड्कारयोर्भेद:। शब्दार्थधर्मता तु गुणानामौपचारकी परम्परया वा इति।

नव्यास्तु नेदं स्वीक्रियते रसमात्रधर्मत्वे गुणानां प्रमाणाभावात् । कारणं तु गुणकार्ययोर्द्वयोरपि दुत्याद्यात्मकावित्तवृतित्वेनैक्यात्। अनलगतस्योष्णस्पर्शरस्येव रसवृत्तिगुणानां तत्कार्यभूतानां द्रुत्यादिचित्तवृत्तीनां विभिन्नतयाऽनुपलम्भात्। अनुमानस्यापि नास्त्यवसर: ,गुणै: सह रसानां कार्यकारणाभावानभ्युपगमात् । वेदान्तानुसारमपि निर्गुणस्यात्मनो गुणाभाव इव काव्यत्मभूतस्य रसस्य निर्गुणस्यात्मनो गुणाभाव एव काव्यात्मभूतस्य रसस्य निर्गुणत्वमेवोचितम् । '' श्रगारोमधुर: '' इति व्यवहारस्तु कथचिद् उपपादनीय: क्वचिदलड्कारस्त्वन्यं रसादिमलंकरोति क्वचिच्च आत्मानमेव । भोजरास्तु स्वभावो वस्तुचितवृत्तीगतत्वेन द्विविध: । स्वभावस्तु गुणरूप एव। अतएव भोजराजेन '' गुणप्राधान्ये स्वभावोक्तिरि'' ति प्रतिपादिता।

**अलड्काराद्ध्वनेर्भेद**

वयंग्यप्राधान्ये एव ध्वनि: , गुणीभूतव्यंग्येऽड्गत्वेवालड्कारताया अड्गीकारात् , अलड्काराद भिद्यते ध्वनि। अलड्कारध्वनौ तु अलड्कारव्यपदेश: ब्राह्मणश्रमणन्यायादेव बोध्य:।

इत्थमेव रसवदलड्कारो रसध्वनेर्भिन्न:, रसस्य प्राधान्ये रसध्वनि:,रसस्याड्गत्वे रसालड्कारतेति सिद्धान्त: । उक्तमपि ध्वन्यालोकस्य द्वितीये उद्योते आनन्दवर्धनाचार्येण -

१. वामन - काव्यालंकारसूत्रवृत्ति: - १.१.२

२. वासन – काव्यालंकारसूत्रवृत्ति: - ३.१.३

'' प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादय:।
काव्ये तस्मिन्नलड्कारो रसादिरिति मे मति: ।।''

अलड्.काराद् वक्रोक्तेर्भेद: - यद्यपि वक्रोक्तिजीवितकारो कुन्तक: वक्रोक्तिमलंकृतिमेव स्वीकुरुते। परन्त्वियम् वक्रोक्ति: अलंकाराद्भिन्ना, यतोहि अलंकाराणां प्रकारत्वेन वक्रोक्तेरनभ्युपगतत्वात् ।

अत: वक्रोक्ति: भिन्ना अलंड्काराद् ।।

उक्तमपि कुन्तकाचार्येण वक्रोक्तिजीविते –

'' उभावेतावलड्कार्यौ तयो पुनरलंकृति:।
वक्रोक्तिरेव वैदग्धभड्गीभणितिख्त्यते ।।

न केवलमलड्कारा वाक्यवक्रतायामन्तर्भाविता:, अपितु रसस्य ध्वनेश्चापि विनिवेशो वक्रोक्ते: प्रकारभूतासु प्रकरणप्रवन्धोपचारवक्रतासु विहित:। अत: स्पष्ट एव वक्रोक्तेरलड्काराद भेद: । यद्यपि कुन्तकाचार्य: वक्रोक्तिरलड्कारताम् अभ्युपगच्छति तथापि – भामह –भट्टोदभट्टादीनाम्अलड्कारपन्थानं न अनुसरति, रसोक्ति – स्वभावोक्त्योरलड्कारवादिनायमलड्कारत्वेन अभिमतयोरलड्कारत्वस्यास्वीकारात् ।

दण्डी – भामह – उद्भठट्ठ – वामनादिभि: कृतो ध्वने: पर्यायोक्ताऽऽक्षेप – समासोक्ति – विशेषोक्त्योदिषु विनिवेशनेन तस्य गौणता वा अभिमता।

कुन्तकाचार्यो वक्रोक्तौ ध्वनिमन्तर्भाव्य तस्यगौणतामड्गीकरोति। अत: स्पष्टं यदलंकारेण वक्रोक्ते: समता न, नैव च रीति-ध्वनि-औचित्यादयोऽपि वक्रोक्ते: तुलामधिरोहन्ति, यतोहि सर्वेषामेषां रीतिध्वन्यादीनां वक्रोक्तेरड्गरूपत्वेन स्वीकारात् ।

आनन्दवर्धनाचार्येण निर्दिष्टं भाक्तत्वं वक्रोक्तित्वच समानम् , यतोहि तत्रान्तर्भावितो व्यंभ्यं

---

१. ध्वन्यालोक - २ उद्योत – ६वीं कारिका

२. वक्रोक्तिजीवितक – १ उन्मेव - १० वीं कारिका

३. ध्वन्यालोक – १ –उद्योत – कारिका

ISSN: 2581-9429 Volume 5, Issue 1, March 2025 Impact Factor: 7.67

गौणतां भजते। वक्रोक्तेरस्या अलङ्कारेण सह समता स्पष्टैव । व्यङ्गयस्य गौणता तत्रापि स्वीक्रियते। अतएव तेन वक्रोक्तिः अलंकारत्वेन स्वीकृता।

यथोक्तं ध्वनिकारेण ध्वन्यालोके-

" काव्यस्यात्मा ध्वनिरिति बुधैः यः समाम्नातपूर्व – तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्यः । केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं, तेन ब्रुमः सहृदयमनः प्रीतये तत्स्वरूपम् ।। एषा वक्रोक्तिः न सर्वथा भाक्तमनुसरति । स्वभावोक्तिरसोक्त्योलङ्कारतायाः स्वीकाराभावात् । भाक्तत्वेनैव चैतयोः अलंकारतायाः अङ्गीकाराच्च। अतः वक्रोक्तिः अलङ्काराद् भिन्ना।

## सन्दर्भ ग्रन्थ सूची


| ग्रन्थ का नाम | व्याख्याकार/सम्पादक | प्रकाशक | वर्ष |
|---|---|---|---|
| रसगंगाधर | श्री मदनमोहनझा | चौखम्भा सं. | १९८७ |
| चित्रमीमांसा | श्री जगदीशचन्द्र | चौ. सं. सी. | १९७१ |
| कुवलयानन्द | डॉ. भोलाशंकर व्यास | चौ. वि. भ. | १९९२ |
| चन्द्रालोक | डॉ. चन्द्रमौलि द्विवेदी | भारतीविद्यासंस्थान | १९९१ |
| रसगंगाधर | भट्टमथुरानाथशास्त्री | मोतीलाल | १९८२ |
| हर्षचरितम | श्रीकान्त पाण्डेय | ज्ञानप्रकाश (मेरठ) | |
| सरस्वतीकण्ठाभरणम् | वासुदेवशर्मणा | चौ.ओ. | १९८७ |
| रसगंगाधर | थानेशचन्द्रउप्रैती | परिमल पब्लिकेशन दिल्ली | |